विमुच्यन्ते नरा देवि यान्ति देव्याः प्रसादतः ॥”
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-प्रदाननामाध्याये ।
“नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
निर्गता मथ्यमानेऽब्धौ उषःस्नानं शुभप्रदम् ॥”
अस्या दानविधिस्तु कामधेनुशब्दे द्रष्टव्यः ॥
धर्म्मपुत्त्रस्य हर्षस्य पत्नी । आनन्दस्वरूपतया एवास्यास्तथात्वम् । यथा, महाभारते । १ । ६६ । ३३ ।
“नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ॥”
शाकद्वीपान्तर्गतनदीविशेषः । यथा, मात्स्ये । १२१ । ३१ ।
“नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥”
“एताः सप्तमहाभागाः प्रतिवर्षं शिवोदकम् ।
भावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनम् ॥”
द्विशालगृहविशेषः । यथा, विश्वकर्म्मप्रकाशे २ अध्याये ।
“नन्दाख्यं तद्विशालञ्च धनदं शोभनं स्मृतम् ॥”)

नन्दात्मजः, पुं, (नन्दस्य आत्मजः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, पाद्मोत्तरखण्डे १९१ अध्याये ।
“पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥”)
दुर्गायाम्, स्त्री ॥

नन्दिः, पुं, स्त्री, (नन्दयतीति । नन्दि+“सर्व्व-धातुभ्य इन् ।” उणां ४ । ११७ । इति इन् ।) द्यूताङ्गम् । (भावे इन् ।) आनन्दः । (यथा, महाभारते । २ । १८ । ११ ।
“सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः ।
मातापित्रोर्नन्दिकरः शुक्लपक्षे यथा शशी ॥”
एतदर्थे स्त्रीलिङ्गेऽपि दृश्यते । यथा, तत्रैव । ५ । १३५ । २० ।
“अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि ॥”)
नन्दिकेश्वरे, पुं । इति मेदिनी । दे, ६ ॥ (यथा, महाभारते । १३ । १४ । २७५ ।
“पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम् ॥”)
विष्णुः । यथा, महाभारते ।१३।१४९।७९ ।
“स्रवः स्रग्नः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥”
(महादेवः । यथा, तत्रैव । १३ । १७ । ७४ ।
“निमित्तस्थो निमित्तञ्च नन्दिर्नन्दिकरो हरिः ॥”)

नन्दिकः, पुं, (नन्द आनन्दः हेतुतयास्त्यस्येति । नन्द+ठन् ।) नन्दीवृक्षः । इति शब्दरत्नावली ॥ (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ॥

नन्दिका, स्त्री (नन्द आनन्द अस्त्यस्यामिति । ठन् ।) इन्द्रक्रीडास्थानम् । इति शब्दमाला ॥ (नन्दा+स्वार्थे कन् । टापि अत इत्वम् ।) अलिञ्जरः । इति शब्दरत्नावली ॥ षष्ठीतिथिः । यथा, तिथितत्त्वे ।
“कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ॥”
प्रतिपदेकादश्यौ च ॥

नन्दिकेश्वरः, पुं, (नन्दिक ईश्वरश्च ।) शिवद्वार-पालः । तत्पर्य्यायः । नन्दी २ शालङ्कायनः ३ ताण्डवतालिकः ४ । इति त्रिकाण्डशेषः ॥ नन्दी-श्वरः ५ तण्डुः ६ । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १८२ । ८६ ।
“ततो नन्दिं महादेवः प्राह गम्भीरया गिरा ।
नन्दिकेश्वर ! संयाहि यतो बाणो रणे स्थितः ॥”)
उपपुराणविशेषश्च ॥

नन्दिघोषः, पुं, (नन्दिरानन्दजनको घोषो यस्य ।) अर्ज्जुनस्य रथघोषः । वन्दिजनघोषः । इति मेदिनी । षे, ५३ ॥ मङ्गलघोषणा च ॥ (हर्ष-घोषयुक्ते, त्रि । यथा, महाभारते । १३ । १०७ । १०५—१०८ ।
“पञ्चविंशे तु दिवसे यः प्राशेदेकभोजनम् ।
सदा द्वादशमासांस्तु पुष्कलं यानमारुहेत् ॥
सिंहव्याघ्रप्रयुक्तैस्तु मेघनिस्वननादितैः ।
स रथैर्नन्दिघोषैश्च पृष्ठतोऽप्यनुगम्यते ॥
देवकन्यासमारूढैः काञ्चनैर्व्विमलैः शुभैः ।
विमानमुत्तमं दिव्यमास्थाय सुमनोहरम् ॥
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ।
सुधारसञ्चोपजीवन्नमृतोपमसुत्तमम् ॥”)

नन्दितरुः, पुं, (नन्दिरानन्दजनकस्तरुः ।) धव-वृक्षः । इति भावप्रकाशः ॥

नन्दिनी, स्त्री, (नन्दयतीति । नन्दि+णिनिः । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशे ।
“रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ॥”
जटामांसी । तत्पर्य्यायो यथा, वैद्यकरत्न-मालायाम् ।
“नलदं नन्दिनी पेशी मांसी लोमजटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥”)
उमा । गङ्गा । ननान्दा । वशिष्ठधेनुः । इति मेदिनी । ने, ८१ ॥ सा च धेनुः सुरभिकन्या । यथा, दिलीपं प्रति वशिष्ठवाक्यम् ।
“पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥”
“इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥”
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य लब्धवरो दिलीपो रघुनामानं वंशतिलकं पुत्त्रं लब्धवान् ॥ * ॥
द्योनामा वसुः पत्नीवाक्यात् एनां हृत्वा वशिष्ठ-शापतः पृथिव्यां भीष्मनाम्ना विख्यात आसीत् । एतत्कथा यथा, महाभारते ।१।९९ ।११-३९।
“अथ तदनमाजग्मुः कदाचिद्भरतर्षभ ! ।
पृथ्वाद्या वसवः सर्व्वे देवा देवर्षिसेवितम् ॥
ते सदारा वनं तच्च व्यचरन्त समन्ततः ।
रेमिरे रमणीयेषु पर्व्वतेषु वनेषु च ॥

तत्रैकस्याथ भार्य्या तु वसोर्व्वासवविक्रम ! ।
सञ्चरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ॥
नन्दिनीं नाम राजेन्द्र ! सर्व्वकामधुगुत्तमाम् ॥
सा विस्मयसमाविष्टा शीलद्रविणसम्पदा ।
द्यवे वै दर्शयामास तां गां गोवृषभेक्षणाम् ॥
स्वापीनाञ्च सुदोग्ध्रीञ्च सुवालधिखुरां शुभाम् ।
उपपन्नां गुणैः सर्व्वैः शीलेनानुत्तमेन च ॥
एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र पुरा पौरवनन्दन ! ॥
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रेन्द्रविक्रम ! ।
उवाच राजंस्तां देवीं तस्या रूपगुणान् वदन् ॥
एषा गौरुत्तमा देवी वारुणेरसितेक्षणा ।
ऋषेस्तस्य वरारोहे ! यस्येदं वनमुत्तमम् ॥
अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे ! ।
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥
एतत् श्रुत्वा तु सा देवी नृपोत्तम ! सुमध्यमा ।
तमुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ॥
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जितवती नाम रूपयौवनशालिनी ॥
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसम्पदा ॥
तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्वामरश्रेष्ठ ! त्वरितं पुण्यवर्द्धन ! ॥
यावदस्याः पयः पीत्वा सा सखी मम मानद ! ।
मानुषेषु भवत्वेका जरारोगविवर्ज्जिता ॥
एतन्मम महाभाग कर्त्तुमर्हस्यनिन्दित ।
प्रियं प्रियतरं ह्यस्मान्नास्ति मेऽन्यत् कथञ्चन ॥
एतत् श्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
पृथ्वाद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा तां जहार गाम् ॥
तया कमलपत्त्राक्ष्या नियुक्तो द्यौस्तदा नृप ! ।
ऋषेस्तस्य तपस्तीव्रं न शशाक निरीक्षितुम् ।
हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ॥
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत् स गां तत्र सवत्सां काननोत्तमे ॥
ततः स मृगयामास वने तस्मिंस्तपोधनः ।
नाध्यगच्छच्च मृगयंस्तां गां मुनिरुदारधीः ॥
ज्ञात्वा तथापनीतां तां वसुभिर्द्दिव्यदर्शनः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥
यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः ॥
एवं शशाप भगवान् वसूंस्तान् भरतर्षभ ! ।
वशं क्रोधस्य संप्राप्त आपवो मुनिसत्तमः ।
शप्त्वा च तान् महाभागस्तपस्येव मनो दधे ॥
एवं स शप्तवान् राजन् ! वसूनष्टौ तपोधनः ।
महाप्रभावो ब्रह्मर्षिर्द्देवान् क्रोधसमन्वितः ॥
अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः ।
शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः ॥
प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ! ।
लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात् ।
आपवात् पुरुषव्याघ्र ! सर्व्वधर्म्मविशारदात् ।
उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः ।
अनुसंवत्सरात् सर्व्वे शापमोक्षमवाप्स्यथ ॥